उद्वेजयन्तः परचक्रवृद्धिम् ॥
यः स्नाति धूल्यान्तु विलोक्य रौति
वृष्टिं समाशंसति वायसोऽसौ ।
जलस्थलप्राणिविपर्य्ययेण
वर्षासु वृष्टिं भयमन्यदा तु ॥
मध्ये दिने वेश्मनि यस्य काको
विरौति रौद्रं विधुनोति वाङ्गे ।
हरन्ति चौरा द्रविणानि तस्य
ध्रुवं तथान्यो भवति प्रमादः ॥
रुवन्नदृष्टस्तृणपूर्णवक्त्रो
ऊताशभीतिं करटः करोति ।
स्यात् प्रस्थितस्याप्यथवा स्थितस्य
दुःखं प्रभूतं दिवसत्रयेण ॥
छायासु लाभं भुवि भूमिलाभं
विघ्नं जले ग्रावणि कार्य्यनाशम् ।
करोति काको विरुवन्नरस्य
प्राख्यायिनः स्थानगतस्य वापि ॥
द्वारप्रदेशेरुधिरानुलिप्तो
विरौति काकः शिशुनाशनाय ।
पक्षौ विधुन्वन् विरुवंश्च रूक्षं
शान्ते च दीप्ते भवने न शस्तः ॥
भूयस्तयोर्द्ध्वे प्रविधाय पक्षौ
काकः कुनादं प्रलयं करोति ।
क्रुद्धोऽधिरूढ़ः करटान्तरञ्च
रोगेण मृत्युं कुरुते नराणाम् ॥
द्रव्ये हृते वापहृते खगेन
विनाशलाभावपि तादृशस्य ।
रुक्मस्य पीते रजतस्य शुक्ले
चौलस्य कार्पासमये भवेताम् ॥
प्रश्ने कृते रोगविनाशबुद्ध्या
हन्त्याशु रोगं सुरवः प्रदीप्ते ।
शान्ते प्रदेशे करटस्थिरेण
वल्गारवो रोगमपाकरोति ॥
प्रश्ने शुभे शान्तदिगाश्रयस्थः
शान्तस्वरो यः शुभमादधाति ।
यो वायसस्तं शुभदं वदन्ति
तद्व्यत्यये व्यत्ययहेतुरुक्तः ॥
विरौति कुम्भे मणिकेऽथवा यः
स गर्भवत्याः सुतजन्महेतुः ।
उड्डीयते कण्टकिनीञ्च शाखा-
मादाय राजागमनाय काकः ॥
अन्नादिविष्ठापिशितादिभिर्यः
पूर्णाननोऽभीष्टफलप्रदोऽसौ ।
मन्त्रादिसिद्धौ वणिजादिलाभे
शस्तो विवाहादिविधौ च काकः ॥
इष्टार्थदोऽश्वादिकवाहनस्थ-
श्छत्रादिसंस्थस्तदवाप्तकारी ।
वध्वागमं जल्पति तोरणस्थो
हर्म्यार्थदो हर्म्यतलस्थितश्च ॥
वायसः कुलकुलध्वनिं यदा
व्याहरेद्भुवनसंमुखं तदा ।
अभ्युपैति पथिकस्तदा ध्वनिं
सर्व्वकार्य्यशुभदं वदत्यसौ ॥
इदं त्रिहोत्पातयुगं पृथिव्यां
महाभयं शाकुनिका वदन्ति ।
यद्वायसो मैथुनसन्निविष्टो
दृश्येत यद्वा धवलः कदाचित् ॥
उद्वेगविद्वेषभयप्रवास-
धनक्षयव्याधिभयप्रहाराः ।
बुद्धिप्रणाशाकुलताप्रवादा
नृणां भवन्त्यद्भुतदर्शनेन ॥
शमाय तत्सूचितदुःखराशेः
स्नानं वहिस्तत्क्षणमेव कुर्य्यात् ।
आत्मीयशक्त्या च सदक्षिणानि
द्विजाय दद्यात् वसनानि तानि ॥
नयेदहःशेषमपुण्यशान्त्या
शयीत भूमावकृताशभक्तः ।
हविष्यभोजी न भजेच्च नारीं
दिनानि सप्त त्रिगुणानि यावत् ॥
अकाकघातव्रतमादधीत
बलिं च दद्याद्बलिभोजनेभ्यः ।
स्नात्वा प्रभाते विदधीत शान्तिं
दद्यात् स्वशक्त्या द्रविणं गुणिभ्यः ॥
देशे तु यत्राद्भुतमेतदुग्र-
मालोक्यते तत्र समापतन्ति ।
अवृष्टिदुर्भिक्षभयोपसर्ग-
चौराग्निशत्रूद्भवधर्म्मनाशाः ॥
कर्म्माणि तस्योपशमाय राजा
प्रवर्त्तयेत् शान्तिकपौष्टिकानि ।
अन्नाद्यगोभूमिवसूनि दद्यात्
युद्धं विदध्यान्न च यावदब्दम्" ॥
इति काकरुते स्थानस्थितप्रकरणं पञ्चमम् ॥ * ॥

अथ स्वरविचारः ।

"ककामिति क्षेमविधौ विरावः
केकामितीष्टाशनयानहेतुः ।
करोति कूं कूमिति चार्थलाभं
क्रां क्रां ध्वनिः काञ्चनलाभमाह ॥
कें केमिति स्त्रीवरयोषिदाप्त्यै
भोगाय कां कामिति शब्दितः स्यात् ।
अपत्यलाभः कु कु इत्यनेन
गन्तुः फलं केकव इत्यनेन ॥
कौं कोमितीदं शुभलाभकारि
कुं कुं निनादः प्रियसङ्गमाय ।
क्रां क्रूमिति क्रामिति च त्रयोऽमी
क्रां क्रामिति द्वौ च रवौ रणाय ॥
क्रां क्रामिति क्रौमिति च द्विरुक्तं
क्रूं क्रूमिति क्रौ कुकु कू इतीदम् ।
रुतं प्रदिष्टं मरणाय नृणां
गन्तुः प्रणाशं कुरुते खगाख्यः ।
क्री क्रीमितीष्टार्थविनाशनाय
ज्वलज्वलेत्यग्निभयाय शब्दः ।
कीकीति कोकाविति यः कथञ्चित्
मुहुर्मुहुः स्यात् स मतो वधाय ॥
स्यात् का इतीदं विफलं सदैव
मित्राप्तये स्यात् क इतीष्टशस्त ।
काका इतीदं तु विघातकारि
करोति काको वदति स्वतुष्ट्यै ॥
आहारदोषाय च काकटीति
स्यादाकुलं कुक्कुनिभं रणाय ।
केकेध्वनिष्काकुटि किं टिकीति
त्रयं त्विदं स्यात् पुरदूषणाय ॥
यत् का इति त्रिस्तदनुस्वरेण
शब्दद्वयं स्यान्महते रणाय ।
कामित्ययं वाहननाशनञ्च
ददाति हर्षं कुकुकुर्व्विनीदम् ॥
यत्का इतीदं विरुतं सुदीर्घं-
क्षतस्वरेणोच्चरितं प्रमादात् ।
उत्साहहीनः श्रमदैन्ययुक्तः
स वायसः कार्य्यविनाशनाय ॥
सामिषं वकवकेति भोजये-
द्वारयेत् कलिकलीति रासनम् ।
अभ्युपैति स्वरऋक्षभाषिते
प्रोषितः शवशवारवे शवः ॥
स्यात् कलिः कवकवध्वनौ नृणां
जायते कणकणाध्वनौ स्वरः ।
आव्रजेत् कुलुकुलुध्वनौ प्रियः
सौदनं कटकटध्वनौ दधि ॥
एवं प्रकारा बहवोऽपरेऽपि
प्रशान्तदीप्ताबलिभोजनानाम् ।
भवन्ति शब्दाः खलु तेषु केचि-
दस्माभिरुक्ताः खलु लक्षणीयाः" ॥
इति काकरुते स्वरप्रकरणं षष्ठम् ॥ * ॥
"हितं नरेभ्यो मुनिभिः पुराणै-
र्ज्ञानं यदुक्तं बलिपिण्डयुक्त्या ।
तदुच्यते संप्रति येन काका
वदन्ति नित्यं बलिलाभतुष्टाः ॥
अदक्षिणस्यां दिशि यत्र काकै-
र्युतो भवेत् क्षीरतरुः प्रभूतो ।
गत्वा निवृत्तेऽहनि तत्र काका
निमन्त्रणीया बलिपिण्डभाज्ये ॥
प्रातस्ततः क्षीरतरोरधस्ता-
द्विशोध्य लिम्पेत् सह गोमयेन ।
भूमिप्रदेशे चतुरस्रमस्य
मध्येऽर्चयेत् ब्रह्ममुरारिभानून् ॥
इन्द्राग्निवैवस्वतयातुधान-
जलेशवायुद्रविणेशशम्भून् ।
अभ्यर्चयेदष्टसु दिक्षु भक्त्या
क्रमेण चाष्टावपि लोकपालान् ॥
नमोयुतैः सप्रणवैश्च सर्व्वा-
न्निजाभिधानैः प्रयतो मनुष्यः ।
अर्घासमालेपनपुष्पधूप-
नैवेद्यदीपाक्षतदक्षिणाभिः ॥
आग्नेयकाष्ठांस्तरुसन्निविष्टा-
नाध्याय तत्राक्षतमन्त्रयुक्त्या ।
ततस्तदर्थं बलिमाज्यसिक्तं
मन्त्रेण दद्यात् दधिपिण्डयुक्तम्" ॥